# Raja Raibhyakritam Gadadhara Stotram

# રાજા રૈભ્યકૃતં ગદાધરસ્તોત્રમ્

## Document Information

Text title : Raja Raibhyakritam Gadadhara Stotram

File name : rAjAraibhyakRRitaMgadAdharastotram.itx

Category : vishhnu, vishnu, krishna, stotra, varAhapurANa

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : varAhapurANa | adhyAya 7/29-38||

Latest update : September 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 4, 2024

*sanskritdocuments.org*

# રાજા રૈભ્યકૃતં ગદાધરસ્તોત્રમ્

રૈભ્ય ઉવાચ ।
ગદાધરં વિબુધજનૈરભિષ્ટુતં ધૃતક્ષમં ક્ષુધિતજનાર્ત્તિનાશનમ્ ।
શિવં વિશાલાસુરસૈન્યમર્દનં નમામ્યહં હતસકલાશુભં સ્મૃતૌ ॥ ૨૯॥

પુરાણપૂર્વં પુરુષં પુરુષ્ટુતં પુરાતનં વિમલમલં નૃણાં ગતિમ્ ।
ત્રિવિક્રમં ધૃતધરણિં બલોર્જિતં ગદાધરં રહસિ નમામિ કેશવમ્ ॥ ૩૦॥

સુશુદ્ધભાવં વિભવૈરુપાવૃતં શ્રિયાऽऽવૃતં વિગતમલં વિચક્ષણમ્ ।
ક્ષિતીશ્વરૈરપગતકિલ્બિષૈઃ સ્તુતં ગદાધરં પ્રણમતિ યઃ સુખં વસેત્ ॥ ૩૧॥

સુરાસુરૈરર્ચ્ચિતપાદપઙ્કજં કેયૂરહારાઙ્ગદમૌલિધારિણમ્ ।
અબ્ધૌ શયાનં ચ રથાઙ્ગપાણિનં ગદાધરં પ્રણમતિ યઃ સુખં વસેત્ ॥ ૩૨॥

સિતં કૃતે ત્રેતાયુગેऽરુણં વિભું તથા તૃતીયે પીતવર્ણમચ્યુતમ્ ।
કલૌ ઘનાલિપ્રતિમં મહેશ્વરં ગદાધરં પ્રણમતિ યઃ સુખં વસેત્ ॥ ૩૩॥

બીજોદ્ભવો યઃ સૃજતે ચતુર્મુખસ્તથૈવ નારાયણરૂપતો જગત્ ।
પ્રપાલયેદ્રુદ્રવપુસ્તથાન્તકૃદ્ગદાધરો જયતુ ષડર્દ્ધમૂર્તિમાન્ ॥ ૩૪॥

સત્ત્વં રજશ્ચૈવ તમોગુણાસ્ત્રયસ્ત્વેતેષુ નાન્યસ્ય સમુદ્ભવઃ કિલ ।
સ ચૈક એવ ત્રિવિધો ગદાધરો દધાતુ ધૈર્યં મમ ધર્મમોક્ષયોઃ ॥ ૩૫॥

સંસારતોયાર્ણવદુઃખતન્તુભિર્વિયોગનક્રક્રમણૈઃ સુભીષણૈઃ ।
મજ્જન્તમુચ્ચૈઃ સુતરાં મહાપ્લવે ગદાધરો મામુદધાતુ પોતવત્ ॥ ૩૬॥

સ્વયં ત્રિમૂર્તિઃ સ્વમિવાત્મનાऽऽત્મનિ સ્વશક્તિતશ્ચાણ્ડમિદં સસર્જ્જ હ ।
તસ્મિઞ્જલોત્થાસનમાર્યતેજસં સસર્જ્જ યસ્તં પ્રણતોऽસ્મિ ભૂધરમ્ ॥ ૩૭॥

મત્સ્યાદિનામાનિ જગત્સુ કેવલં સુરાદિસંરક્ષણતો વૃષાકપિઃ ।
મુખ્યસ્વરૂપેણ સમન્તતો વિભુર્ગદાધરો મે વિદધાતુ સદ્ગતિમ્ ॥ ૩૮॥

ઇતિ વરાહપુરાણે સપ્તમાધ્યાયાન્તર્ગતં રાજા રૈભ્યકૃતં

ગદાધરસ્તોત્રં સમાપ્તમ્ ।

વરાહપુરાણ । અધ્યાય ૭/૨૯-૩૮॥

varAhapurANa . adhyAya 7/29-38..

Proofread by PSA Easwaran

*Raja Raibhyakritam Gadadhara Stotram*

pdf was typeset on September 4, 2024

Please send corrections to *sanskrit@cheerful.com*